# Sutaprokta Shivanamamahima

# સૂતપ્રોક્તા શિવનામમહિમા

## Document Information

Text title : Sutaprokta Shivanamamahima

File name : sUtaproktAshivanAmamahimA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 1 | 21-30||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# સૂતપ્રોક્તા શિવનામમહિમા

મહેશનામામૃતદિવ્યધારાપરિપ્લુતાઙ્ગો દવમધ્યગોઽપિ ।
ન શોકમાપ્નોતિ નરો યતોઽહં સંરક્ષિતો વહ્નિગતઃ શિવેન ॥ ૨૧॥

યતો વિભૂતિકવચાઃ શિવનામાસ્ત્રપાણયઃ ।
ચત્વાર એવ યામીયૈશ્ચક્રુર્યુદ્ધં પુરા મુદા ॥ ૨૨॥

બ્રહ્મહત્યાસહસ્રાણિ પુરા કૃત્વાપિ પુલ્કસઃ ।
શિવેતિ નામ વિમલં શ્રુત્વા મોક્ષં ગતઃ પુરા ॥ ૨૩॥

એતેઽપિ પ્રમથાઃશુદ્ધાઃ શિવનામામૃતાશનાઃ ।
ઇન્દ્રાદ્યર્ચિતપાદાબ્જાઃ વસન્તિ શિવસન્નિધૌ ॥ ૨૪॥

શિવનામૈવ સંસારમહારોગૈકશામકમ્ ।
નાન્યત્સંસારરોગસ્ય શામકં દૃશ્યતે મયા ॥ ૨૫॥

શિવ શઙ્કર રુદ્રેતિ મહાદેવેતિ યન્મયા ।
પૂર્વમુચ્ચરિતં યુદ્ધે જયસ્તેનાભવન્મમ ॥ ૨૬॥

શઙ્કરેશ મહેશેતિ નામ દિવ્યં મહાવને ।
પુરા શ્રુતં પિશાચેન તતસ્તસ્માત્સ મોચિતઃ ॥ ૨૭॥

સમસ્તવેદવેદાન્તસારભૂતં શિવપ્રદમ્ ।
શિવનામામૃતં દિવ્યં પેયં સર્વાર્થસાધકમ્ ॥ ૨૮॥

યે સન્તતં શઙ્કરમાદરેણ
મનઃસરોજાસનસન્નિવિષ્ટમ્ ।
ધ્યાયન્તિ શમ્ભું (શમ્ભોઃ) સ્મરણાનુરક્તાઃ (ધ્યાયન્તિ શમ્ભુસ્મરણાનુરક્તા)
ત એવ ધન્યાઃ શિવસમ્મતાશ્ચ ॥ ૨૯॥

શિવનામામૃતાપ્લુષ્ટરસનાઃ શિવપૂજકાઃ ।
શિવધ્યાનરતા નિત્યં સન્તિ ધન્યાઃક્વચિત્ક્વચિત્ ॥ ૩૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સૂતપ્રોક્તા શિવનામમહિમા સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧ । ૨૧-૩૦॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 1 . 21-30..

Proofread by Ruma Dewan

*Sutaprokta Shivanamamahima*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*